दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-131 | 1 | मार्च 11, 2025 | Website- www.himsanskritam.com Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य कालयुक्तः वि.सं. २०८१,
कलियुगाब्धः ५१२५ वसन्त-ऋतुः
सूर्यः उत्तरायणः फाल्गुणः शुक्ल द्वादशी
तिथिः फाल्गुणः 28 प्रविष्टांशः मङ्गलमयः भवेत्

2 छात्राणां न्यूनसंख्या युक्ताः शैक्षणिकसंस्थाः पिहिताः भविष्यन्ति,

3 अखिलभारतीयसिविलसेवासुयोगासनस्पर्धायां उत्तराखण्डस्य विजयध्वजः, ३ रजतपदकं २ कांस्यपदकं च प्राप्तवन्तः

4 उत्तरप्रदेशसंस्कृतसंस्थाने प्रशिक्षणस्य सहभागिभिः प्रशिक्षुभिः समाचरितः अन्ताराष्ट्रियः महिलादिवसः

## संसदः वित्तसङ्कल्पना-पत्रसत्रस्य द्वितीय-भागः पुनः प्रारब्धः;

### राज्यसभायां रेलसंशोधन विधेयके चर्चा जाता

हिमसंस्कृतवार्ताः। लोकसभया गतवर्षस्य लेडिंग-बिल इति विधेयकं विचाराय अनुमोदनाय च कथितम्। इदं विधेयकं षट्पञ्चाशदधिक-अष्टादश-शततमस्य बिल ऑफ लेडिंग इति भारतीयाधिनियमं प्रतिस्थापयितुं प्रयतते यत् लेडिंग बिल इत्यस्य विधेयकस्य निर्गमनार्थं विधिसम्बद्ध-संरचना प्रददाति। विधेयकमिदं मालवाहकेन प्रेषकाय प्रदीयमानं पत्रं निर्दिशति। केन्द्रीयमन्त्री सर्बानन्द-सोनोवालः सदने विधेयकं प्रस्तुतवान्।



### संसदः द्वयोः सदनयोः कोलाहलः जातः

वित्तसंकल्पनापत्र-सत्रस्य द्वितीय चरणस्य प्रथमे दिवसे संसदः द्वयोः सदनयोः कोलाहलः जातः। तमिलनाडुराज्ये राष्ट्रियशिक्षानीतेः कार्यान्वयनविषये शिक्षामन्त्रिणः धर्मेन्द्रप्रधानस्य टिप्पण्यां डी.एम.के. इत्येतस्य तथा च काङ्ग्रेसदलस्य सांसदः विरोधप्रदर्शनं कृतवन्तः। कोलाहलमध्ये सदनं मध्याह्न द्वादशवादनं यावत् स्थगितम्। प्रश्नकालावधौ डीएमके सांसदेन टी. सुमति उत वा थमिझाची थंगापांडियन् इत्यनेन तमिलनाडुराज्याय धनावण्टितस्य विषयः उत्थापितः। मध्याह्न-द्वादशवादनस्य अनन्तरं सदनोपवेशनं पुनः प्रारब्धम्।

## सुभाषितम्

वृत्तं यत्नेन संरक्ष्येद्,
वित्तमेति च याति च।
अक्षीणो वित्ततः क्षीणो,
वृत्ततस्तु हतो हतः॥

मनुष्य को प्रयत्नपूर्वक सदाचार की रक्षा करनी चाहिए, वित्त तो आता जाता रहता है। वस्तुतः धन से क्षीणत् मनुष्य क्षीण नहीं, अपितु सदाचार और अच्छे संस्कारों से विहीन मनुष्य क्षीण और दरिद्र है।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp

## न्यूजीलैण्ड-देशस्य प्रधानमन्त्री क्रिस्टोफर लक्सन षोडश-दिनाङ्कादारभ्य

### भारतस्य पञ्चदिवसीय यात्रायां भविष्यति

हिमसंस्कृतवार्ताः। न्यूजीलैण्ड-देशस्य प्रधानमन्त्री क्रिस्टोफर लक्सन इत्येषः अस्य मासस्य षोडश-दिनाङ्कादारभ्य भारतस्य पञ्चदिवसीय यात्रायां भविष्यति। तेन सह उच्चस्तरीयः प्रतिनिधिमण्डलोपि आगमिष्यति, यस्मिन् मन्त्रिणः, वरिष्ठाधिकारिणः, औद्योगिकनेतारः, वर्ताहराणां प्रतिनिधयः, भारतीयप्रवासि-समुदायस्य सदस्याः च सन्ति। विदेशमन्त्रालयेन विज्ञप्तौ उक्तं यत् यात्रावधौ प्रधानमन्त्री लक्सनः प्रधानमन्त्रिणा नरेन्द्रमोदिना सह भारत-न्यूजीलैण्ड-देशयोः सम्बन्धानां विविधेषु पक्षेषु चर्चा करिष्यति। सः पञ्चविंशत्यधिक-द्विसहस्रतम वर्षस्य दशमः रैसिनासंवादस्य उद्घाटनसत्रे मुख्यातिथिरूपेण अपि भागं गृह्णीयात्, मुख्यभाषणं च दद्यात्। श्रीलक्सनः राष्ट्रपति पदासीनया द्रौपदी मुर्मू वर्यया सहापि मेलनं करिष्यति।

## वानुअतु द्वीपराष्ट्रस्य प्रधानमन्त्रिणा ललितमोदिनं प्रति पारपत्रम् निरस्तं कर्तुं आदेशः प्रदत्तः

हिमसंस्कृतवार्ताः। वानुअतु द्वीपराष्ट्रस्य प्रधानमन्त्रिणा जोथम नापत इत्यनेन नागरिकता-योगाय भारतीयप्रीमियरलीग इत्यस्य पूर्वप्रमुखं ललितमोदिनं प्रति निर्गतं वानुअतु पासपोर्ट इति पारपत्रम् निरस्तं कर्तुं आदेशः प्रदत्तः। नापतेन वानुअतुनागरिकतां प्राप्तुं सौभाग्यं न तु अधिकारः इति बोधितम्। दक्षिणप्रशान्त-सागरस्य लघुद्वीपराष्ट्रस्य वानुअतुनगरस्य नागरिकतां ललितमोदिना प्राप्तम् इति वार्तावाहिनीसु प्रकाशितानन्तरम् एषः निर्णयः अभवत्। गतशुक्रवासरे विदेशमन्त्रालयेन पुष्टिः कृता यत् ललितमोदी लण्डननगरे भारतीयोच्चायोगे स्वस्य भारतीयपारपत्र समर्पणार्थम् आवेदनं कृतवान् आसीत्। विदेशमन्त्रालयस्य प्रवक्त्रा रणधीर-जायसवालेन उक्तं यत् विद्यमान-नियमानुसारम् अनुरोधस्य समीक्षा भविष्यति। भारतं तस्य विरुद्धं विधि-प्रक्रियानुसारं कार्याचरणम् करिष्यति इति सः बोधितवान् । ललितमोदी IPL इत्यस्य प्रमुखत्वेन कार्यकाले कोटिरूप्यकाणां भ्रष्टाचारं कृतवान् इत्यस्मिन् आरोपे सः वाञ्छितः अस्ति। सः दशाधिक-द्विसहस्रतमे वर्षे भारतं त्यक्त्वा लण्दन्-नगरे निवसति ।

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## कम्बोडिया-देशस्य सिम-रीपनगरे तृतीयः भारत-कम्बोडिया-विदेशकार्यालयपरामर्शः

हिमसंस्कृतवार्ताः। कम्बोडिया-देशस्य सिम-रीपनगरे तृतीयः भारत-कम्बोडिया-विदेशकार्यालयपरामर्शः आयोजितः। परामर्शः मैत्रीपूर्णवातावरणे आयोजितः। यत्र राजनैतिकसहकार्य, व्यापारः निवेशश्च, रक्षासुरक्षा, विकाससाहाय्यं, रिक्थसंरक्षणं, पुनर्स्थापनं, वाणिज्यदूतावासः, द्विपक्षीयसम्बन्धानां सम्पूर्णपक्षः इत्येतेषां विषयाणां समीक्षायाः अवसरः प्रदत्तः।

## जलजीवनोपक्रपस्य कारणेन अशीति-प्रतिशताधिक ग्रामीणपरिवाराः नलिकया जलं प्राप्नुवन्ति-केन्द्रीयजलशक्ति मन्त्री सी.आर. पाटिलः

हिमसंस्कृतवार्ताः। केन्द्रीयजलशक्ति मन्त्री सी.आर. पाटिलः उक्तवान् यत् जलजीवनोपक्रपस्य कारणेन अशीति-प्रतिशताधिक ग्रामीणपरिवाराः नलिकया जलं प्राप्नुवन्ति। राज्यसभायाम् एकस्य प्रश्नस्य प्रत्युत्तरे श्रीपाटिलः उक्तवान् यत् नवदशाधिक-द्विसहस्रतमे वर्षे केवलं षोडश-प्रतिशत ग्रामीण-परिवाराणां पार्श्वे नलजलस्य सौविध्यम् आसीत्। इतः प्राक् संसदः बहिः वार्ता कुर्वन् केन्द्रीयजलशक्ति मन्त्री सी.आर. पाटिलः उक्तवान् यत् गङ्गानद्याः जलं शुद्धं न तु मलिनम् इति।

## रूसदेशः द्वौ ब्रिटिशराजनयिकौ गुप्तचर्यायाः आरोपे देशात् बहिः गन्तुम् आदेशं दत्तवान्

हिमसंस्कृतवार्ताः। रूसदेशः द्वौ ब्रिटिशराजनयिकौ गुप्तचर्यायाः आरोपे सप्ताहद्वयोः आभ्यन्तरे देशात् बहिः गन्तुम् आदेशं दत्तवान्। रूसस्य सङ्घीयसुरक्षासेवा (FSB) इत्यनया कूटनीतिज्ञानाम् उपरि आरोपितं यत् ते मिथ्या निजदत्तांशं प्रदातुं, राष्ट्रियसुरक्षायाः कृते समाह्वनानि जनयितुं कार्याणि कुर्वन्तः आसन् परञ्च प्रमाणं नास्ति। रूसीविदेश मन्त्रालयेन




ब्रिटिशदूतावासस्य एकम् अधिकारिणम् आहूय स्वक्षेत्रे "अघोषितब्रिटिश-गुप्तचर-पदाधिकारिणः" न सहते इति यूक्रेनदेशस्य विषये वर्धमानायाः चिन्तायाः मध्ये पूर्वं निष्कासनस्य अनन्तरक् एतत् पदक्षेपः कृतः। द्वाविंशत्यधिक-द्विसहस्रतम-वर्षात् आरभ्य रूस-पाश्चात्यराष्ट्रयोः मध्ये शतशः राजनयिकाः निष्कासिताः सन्ति

# छात्राणां न्यूनसंख्या युक्ताः शैक्षणिकसंस्थाः पिहिताः भविष्यन्ति, आसनानि वर्धयिष्यन्ते, यात्रायाः व्ययः सर्वकारः वहति- मुख्यमंत्री सुक्खुः



**हिमसंस्कृतवार्ताः - शिमला।**
मुख्यमन्त्री सुखविन्द्रसिंहसुक्खुः राजीवगान्धी-राजकीयमहाविद्यालयस्य चौड़ामैदानम् शिमला इत्यस्य वार्षिककार्यक्रमस्य अध्यक्षतां कुर्वन् वर्तमानः राज्यसर्वकारः कठिनपरिस्थितौ अपि स्वावलम्बी हिमाचलस्य आधारं स्थापयति इति अवदत्। सः अवदत् यत् राजनैतिकलाभाय केवलं कतिपयेषु जनेषु राज्यस्य धनस्य अपव्ययः न सम्यक् किन्तु समाजस्य प्रत्येकं वर्गः स्वस्य अधिकारं प्राप्नुयात्। सः अवदत् यत् राज्यसर्वकारः व्यवस्थायाः उन्नयनार्थं बहवः निर्णयाः गृह्णाति, भविष्ये अपि अस्मिन् दिशि पदानि गृह्यन्ते।

मुख्यमंत्री सुखविन्दरसिंहसुक्खुः उक्तवान् यत् शिक्षायाः परिष्कारार्थं राज्यसर्वकारः आगामिशैक्षणिकसत्रात् जिलामुख्यालये सर्वकारीयवरिष्ठमाध्यमिकविद्यालयेषु सहशिक्षणं आरभेत। सः अवदत् यत् राज्यसर्वकारः प्रत्येकस्मिन् विधानसभाक्षेत्रे राजीवगान्धीदिवसस्य आवासीयविद्यालयाः चरणबद्धरूपेण उद्घाटयति तथा च अग्रिमसत्रात् एतादृशाः दश विद्यालयाः कार्यं आरभन्ते। एतेषु विद्यालयेषु तरणकुण्डः, आन्तरिकक्रीडाङ्गणं, क्रीडाक्रियाणां कृते च उत्तमाः आधारभूतसंरचनाः भविष्यन्ति । सः अवदत् यत् पूर्वभाजपासर्वकारेण निर्वाचनलाभानां कृते स्वस्य कार्यकालस्य गतषड्मासेषु ९०० संस्थाः उद्घाटिताः परन्तु वर्तमानराज्यसर्वकारः गुणवत्तापूर्णशिक्षाप्रदानस्य उपरि बलं ददाति येन ते भविष्यस्य आह्वानानां सम्यक् सम्मुखीकरणं कर्तुं शक्नुवन्ति।

मुख्यमन्त्री उक्तवान् यत्, “सर्वकारीयशिक्षणसंस्थानां छात्राः अन्येभ्यः न्यूनाः न सन्ति। अहं स्वयमेव सर्वकारीयविद्यालयात् अध्ययनं कृत्वा हिमाचलप्रदेशस्य मुख्यमन्त्रीपदं प्राप्तवान्। यदि अहं मुख्यमन्त्री भवितुम् अर्हति तर्हि सर्वकारीयविद्यालयानाम् बालकाः अपि स्वजीवने यत्किमपि लक्ष्यं प्राप्तुं शक्नुवन्ति। अतः राज्यसर्वकारः सर्वकारीयशिक्षणसंस्थासु सुविधां वर्धयति, गुणवत्तापूर्णशिक्षाप्रदानार्थं च सर्वप्रयत्नाः करोति सः अवदत् यत् राज्यसर्वकारस्य उद्देश्यं केवलं उपाधिप्रदानं न अपितु गुणवत्तापूर्णशिक्षाप्रदानं भवति येन ते भविष्यस्य आह्वानानां आत्मविश्वासेन सम्मुखीकरणं कर्तुं शक्नुवन्ति।

## न्यूनसंख्यायुक्ताः शैक्षणिक-संस्थाः पिहिताः भविष्यन्ति

मुख्यमंत्री सुक्खुः अवदत् यत् येषु शैक्षणिकसंस्थानेषु छात्राणां संख्या न्यूना अस्ति अथवा यत्र छात्राः गुणवत्तापूर्णशिक्षां न प्राप्नुवन्ति ते अग्रिमशैक्षणिकसत्रात् पिहिताः भविष्यन्ति तथा च एतादृशानां शैक्षणिकसंस्थानां छात्राणां कृते समीपस्थेषु उत्तमसंस्थानेषु आसनानि वर्धयिष्यन्ते तथा च छात्राणां यात्राव्ययः अपि राज्यसर्वकारेण प्रदत्तः भविष्यति। सः अवदत् यत् आगामिषु पञ्चषु वर्षेषु हिमाचलप्रदेशस्य शिक्षाव्यवस्था विश्वस्तरीया भविष्यति, यस्य कृते राज्यसर्वकारस्य धनस्य अभावः नास्ति। सः अवदत् यत् राज्यसर्वकारः परिष्कारस्य दिशि एकं पदं गृह्णाति, नर्सरीतः १२ कक्षापर्यन्तं एकमेव शिक्षानिदेशालयं निर्मातुम् गच्छति।

मुख्यमन्त्री राजीवगान्धीराजकीयमहाविद्यालयचौड़ा मैदानमहाविद्यालये केन्द्रीयतापनप्रणालीस्थापनस्य घोषणां कृत्वा महाविद्यालये आगामि शैक्षणिकसत्रात् महाविद्यालये अर्थशास्त्रस्य, राजनीतिशास्त्रस्य, आङ्ग्लभाषायाः च स्नातकोत्तरकक्षाः आरब्धाः भविष्यन्ति इति घोषितवान्। असौ महाविद्यालयस्य मेधावीछात्राणां अपि सम्मानं कृतवान् ।

# लघ्वीकाश्यां मण्ड्यां एकादशकक्ष्यायाः छात्राया आत्महत्यायाः दुःखदघटना

हिमसंस्कृतवार्ताः - डॉ पद्मनाभः। मंडी।हिमाचलप्रदेशस्य मण्डी जनपदे एकादशकक्ष्यायाः छात्रा गतरात्रौ द्विवादने ब्यासनद्यां कूर्दयित्वा आत्महत्या अकरोत्। एनडीआरएफ तथा स्थानीयपुलिस इत्येताभ्यां छात्रायाः शवः उद्धृतः। प्राप्तसूचनानुसारं छात्रायाः पिता मोबाइलबन्धनेन ताम् कोपेन तर्जितवान्। एतद् तर्जनं तस्याः मनसि अतीवं संतापं उत्पाद्य सा रोषेण एवं खेदेन व्याकुला जाता। परिणामतः सा ब्यासनद्यां प्रविश्य स्वस्य जीवनस्य अंतं कृतवती। एषा छात्रा गोहर उपमण्डलात् आसीत्, या नॉन-मेडिकल अध्ययनं कुर्वन्ती आसीत्।

# HPBOSE 12th Exam : २९ मार्च दिनाङ्के भविष्यति द्वादशीकक्षायाः आङ्ग्लपरीक्षा

हिमसंस्कृतवार्ताः - धर्मशाला। हिमाचलप्रदेशस्य विद्यालयीयशिक्षामण्डलं १२ कक्षायाः आङ्ग्लविषयपरीक्षां २९ मार्च दिनाङ्के स्वीकरिष्यति या ८ मार्च दिनाङ्के स्थगिता आसीत्। इयं परीक्षा राज्ये २३०० परीक्षाकेन्द्रेषु द्वितीयसत्रे सायं २ तः ५ वादनपर्यन्तं भविष्यति। विद्यालयीयशिक्षामण्डलेन अस्याः परीक्षायाः समयसूची प्रकाशिता। अस्याः परीक्षायाः कालखण्डे राज्ये नियमित-राज्य-मुक्त-विद्यालयानाम् अन्तर्गतं आगच्छन्तः प्रायः ९३४९४ छात्राः परीक्षायां उपस्थिताः भविष्यन्ति ।


समाचारानुसारं ७ मार्च दिनाङ्के चम्बामण्डलस्य अन्तर्गतं सर्वकारीये वरिष्ठमाध्यमिकविद्यालये चुवाड़ी इत्यत्र १० कक्षायाः आङ्ग्लपरीक्षायाः समये केन्द्रकर्मचारिभिः ८ मार्चदिनाङ्के प्रस्तावितायाः १२ कक्षायाः आङ्ग्लपरीक्षायाः प्रश्नपत्रम् उद्घाटितम्। बोर्डप्रबन्धनेन एषः उपालम्भः ई-मेलद्वारा प्राप्तः। तदनन्तरं परीक्षामित्र- मोबाईल-अनुप्रयोगे इत्यत्र अद्यतनकृतस्य विडियोद्वारा शिक्षामण्डलेन अपि तस्य पुष्टिः कृता। अस्माद् कारणात् हिमाचलप्रदेशविद्यालयीयशिक्षामण्डलेन १२वीं कक्षायाः आङ्ग्लविषयपरीक्षा निरस्तीकृता आसीत् ।अपरपक्षे हिमाचलप्रदेशविद्यालयीयशिक्षामण्डलस्य सचिवः डॉ. मेजरविशालशर्मा अवदत् यत् निरस्तीकृता १२ कक्षायाः आङ्ग्लविषयपरीक्षा राज्ये २९ मार्च दिनाङ्के सायं सत्रे भविष्यति। अस्मिन् विषये अधिसूचना प्रसारिता अस्ति।

# अगरतलायाः काथियावावा-निम्वार्क-आश्रमे संस्कृतसम्भाषणशिविरम्



हिमसंसकृतवार्ता - 10 मार्च, अगरतला, त्रिपुरा। केन्द्रीयसंस्कृतविश्वविद्यालयस्य मुक्तस्वाध्यायपीठेन सञ्चालित-संस्कृताध्ययनकेन्द्रेन अद्य आरभ्य अगरतलायाः काथियावावा-निम्वार्क-आश्रमे सप्तदिवसीयसंस्कृतसम्भाषणशिविरस्य उद्घाटनम् जातम्। संयङ्काले 6:30वादने अनुस्थिते उद्घाटनकसत्रे उपस्थितमासीत् काथियावावा निम्वार्क-आश्रमस्य प्रमुखः श्रीश्रीगोविन्ददासमहन्तवर्यः। विशेषैः आशिर्वचनैः सभायाः उद्बोधनः कृतः श्रीश्रीभगवान-दास-काथियामहाराजः । विशिष्टसमाजसेवकः अवसरप्राप्त- कार्यकर्ता अभिजितभट्टाचार्यवर्येन व्यवस्थिते शिविरेऽस्मिन् मुख्यशिक्षकरूपेन नयनज्योतिशर्मना संस्कृतशिक्षणविषये विस्तृतं भाषणं प्रदत्तम्। उद्घाटनकार्यक्रमात् परं कालांशस्य प्रारम्भः जातः। शिविरेऽस्मिन् सामाजिकेषु छात्राः अध्यापकाः गृहिण्यश्च भागग्रहणं कृतवन्तः। शिविरमिदम् मार्चमासस्य षोडश-दिनाङ्कयावत् चलिष्यति।

# अम्ब-ऊना-राजमार्गे धन्धदी-मुख्यमार्गे मार्गदुर्घटनायां द्वयोः जनयोः मृत्युः



हिमसंस्कृतवार्ताः। उपमण्डलक्षेत्रस्य अन्तर्गतं अम्ब-ऊना-राजमार्गे धन्धदी-मुख्यमार्गे सोमवासरे सायं दुःखद-मार्गदुर्घटनायां द्वयोः जनानां मृत्युः अभवत् । दुर्घटनायां त्रयः जनाः गम्भीररूपेण घातिताः सन्ति। मृतानां सेक्टर-४३ विशालः, सेक्टर-३८ पश्चिमचण्डीगढनिवासी मञ्जीतः च इति ज्ञाताः, घातिताः यमुनानगरविक्रमनिवासिनः नाथीरामस्य (चालकस्य) पुत्रः गुरमेलसिंहः, चण्डीगढस्य सेक्टर्-४० निवासी नरेशकुमारस्य पुत्रः मोहितः इति ज्ञाताः सन्ति। घातितान् सिविल हॉस्पिटलम् अम्ब. यत्र प्रथमचिकित्सायाः अनन्तरं वैद्यः त्रयः अपि घातिताः इत्युक्त्वा क्षेत्रीयचिकित्सालये ऊना प्रेषितवान्। सूचनां प्राप्य पुलिसजनैः अग्रे कार्यप्रक्रिया आरब्धा । सूचनानुसारं सोमवासरे सायं अम्बतः ऊनानगरं गच्छन्तं फॉर्च्यूनर्-कारयानम् विपरीतदिशातः आगच्छन्तं टैंकरयानेन शिरसा घट्टनं कृतवान्। दुर्घटना एतावत् भयंकरा आसीत् यत् फॉर्च्यूनर्-कारस्य खण्डखण्डः अभवत् । बहुप्रयत्नानन्तरं स्थले उपस्थिताः जनाः घातितान् बहिः निष्कास्य एम्बुलेन्सयानेन सिविल हॉस्पिटल अम्बं प्रेषितवन्तः। सहसा यानं पुरतः आगतं असहायं पशुं तारयितुं प्रयतमाने अयं दुर्घटना अभवत् इति कथ्यते। आवाम् भवद्भ्यः कथयामः यत् याने स्थिताः जनाः चण्डीगढतः काङ्गरामण्डलं यावत् बगलामुखीमन्दिरं नमस्कारं कर्तुं एकत्र आगत्य दुर्घटनायाः ग्रस्ताः अभवन्

# हिमाचलप्रदेशस्य चंबाचिकित्सा महाविद्यालये भविष्ये एमडी तथा एमएस अध्ययनं भविष्यति



हिमसंस्कृतवार्ताः- डॉ पद्मनाभः।
चंबा। पंडितजवाहरलालनेहरू-चिकित्सा-महाविद्यालये चंबायाम् इदानीं एमडी (चिकित्सा) तथा एमएस (अस्थिरोग) विषययोः विशेषज्ञाः प्रशिक्ष्यन्ते। प्रदेशस्य सर्वकारेण उभय-विभागयोः द्वे-द्वे आसनं अनुमोदितं। शीघ्रमेव केन्द्र-सर्वकारतः अपि स्वीकृतिः अपेक्ष्यते।

अस्मिन कृते एनएमसी (नेशनल मेडिकल काउंसिल) दलं शीघ्रमेव चंबा चिकित्सा महाविद्यालयस्य निरीक्षणं करिष्यति। निरीक्षणस्य समये एतयोः पाठ्यक्रमयोः आरम्भाय आवश्यकाः औपचारिकताः सम्पाद्यन्ते। एनएमसी-प्रतिवेदनस्य आधारे केन्द्र-सर्वकारः पाठ्यक्रमाय अन्तिमं अनुमोदनं ददाति।

एमबीबीएस इत्यस्य पञ्चवर्षीय पाठ्यक्रमं समाप्य चिकित्सकः विशेषज्ञत्वाय त्रिवर्षीयं विशेष-अध्ययनं करोति। अद्यत्वे टांडा, शिमला अन्येषु वा विशाल-चिकित्सा-संस्थानेषु गन्तव्यं भवति। किन्तु इदानीं चंबायामेव एमडी तथा एमएस अध्ययनं सम्भवम्। अस्य लाभेन जनपदस्य चिकित्सालयानाम् विशेषज्ञ-चिकित्सकाः लभ्यन्ते, स्वास्थ्यसेवाः च दृढीकृताः भविष्यन्ति।
एमडी, एमएस इत्येतौ कृत्वा चिकित्सकाः त्रिवर्षपर्यन्तं चिकित्सा-महाविद्यालये सेवां करिष्यन्ति, येन रोगिणां कृते अपि उपकारः भविष्यति। चंबा चिकित्सा महाविद्यालये प्रशिक्षिताः विशेषज्ञाः भविष्ये जनपदस्य अन्येषु स्वास्थ्य-संस्थानेषु अपि सेवां दातुं शक्नुवन्ति, यतः समस्ते नागरिक-चिकित्सालयेषु विशेषज्ञानां महती न्यूनता अस्ति। प्रदेशस्य अन्येषु सर्वकारी-चिकित्सा-संस्थानेषु अपि एषाम् विशेषज्ञ स्वास्थ्य-संस्थासु नियुक्ताः भविष्यन्ति।

## अनेन जनपदस्य चिकित्सालयेषु विशेषज्ञ-चिकित्सकाः प्राप्यन्ते, येन आरोग्य-सेवा सुदृढा भविष्यति।

एमडी तथा एमएस इत्येतयोः अध्ययनं कुर्वन्तः चिकित्सकाः त्रिवर्षपर्यन्तं चिकित्स-महाविद्यालये सेवां दास्यन्ति, येन रोगिणः अपि लाभं प्राप्स्यन्ति। चंबा-चिकित्सा-महाविद्यालये शिक्षिताः विशेषज्ञाः भविष्ये जनपदस्य स्वास्थ्य-संस्थासु अपि स्वसेवां दातुं शक्नुयुः। सम्प्रति समस्तेषु नागरिक-चिकित्सालयेषु विशेषज्ञानां महान् अभावः अस्ति। एते विशेषज्ञाः प्रदेशेऽपि अन्येषु स्वास्थ्य-संस्थासु नियुक्ताः भविष्यन्ति। प्रदेशस्य एकस्मिन आकांक्षी-जनपदे अनेन उपायेन स्वास्थ्यसेवायाः महत्परिष्कारः भविष्यति।

## एनएमसी निरीक्षणानन्तरं पाठ्यक्रमस्य आरम्भः

चिकित्सा-महाविद्यालय-चंबायाः प्रवक्ता डॉ. मानिक-सहगल महोदयः अवदत् यत् प्रदेश-सर्वकारतः चत्वारि आसनानि अनुमोदितानि। एनएमसी-समीत्या निरीक्षणानन्तरं एते पाठ्यक्रमाः अन्तिमरूपेण स्वीकृताः भविष्यन्ति। ततः परं एमडी तथा एमएस इत्येतयोः अध्ययनं आरभ्यते।

# इमलिया इत्याख्ये ग्रामे सहर्षोल्लासं एनएसएस शिविरं स्वप्रभावं प्रकाशयति



हिमसंस्कृतवार्ताः। केन्द्रीय -संस्कृत-विश्वविद्यालयभोपालपरिसरेण इमलियानाम्नि ग्रामे एनएसएस शिविरम् आयोज्यमानं वर्तते।यस्यान्तर्गते तृतीयदिवसे दिनचर्यायां प्रातः काले योगासनानि व्यायामादि-अपेक्षितदिनचर्यां कृत्वा ग्रामभ्रमणेन जनानां प्रोत्साहनं कृतम्, अनेन ग्रामभ्रमणेन जनोत्कर्षता प्रभाविता। 'श्रमेण सर्वं साध्यम्' इति ध्येयवाक्यम् अनुसृत्य सर्वे स्वयं सेवकाः स्व-स्व कार्यं सोत्साहं निर्वहणमकुर्वन् तथाभूताः स्वयं सेवकाः न केवलं कार्यं कृतवन्तः अपितु सेवाजीवनमेव सर्वोपरि वर्त्तते इत्यपि अनुभूतवन्तः। ततः परं भोजनं क्षणिकविश्रामश्चासमभवत् । विशिष्टरूपेण मध्याह्नसत्रमासीत्, सत्रेऽस्मिन् बौद्धिकसत्रस्य आयोजनमासीत्। यस्यारम्भः माङ्गलिकसमुद्घोषेण दीपप्रज्वलेन साकं स्वामी विवेकानन्दमहोदयस्य प्रतिमापूजनं ततः परं 'उठें समाज के लिए उठें' इत्यस्य एनएसएसकुलगीतप्रस्तुति उमा दास प्रभृतिभिः छात्रवृन्दैः आलापिता, अथ च एतैः स्वयं सेवकैः अतिथीनां स्वागतसम्मानम् तिलकपुष्पगुच्छप्रदानेन बेजनियोजनेन च एनएसएस परम्परामनुसृत्य समपद्यत। तथा च स्वागतभाषणं राकेश वर्मा महोदयेन कृतम्, ततोर्ध्वं मुख्यातिथिवर्येण एच.आर.प्रभाकरमहोदयः (सहायक निर्देशकः कृषिविभागः,मध्यप्रदेशशासनम्) अस्मान्सर्वान् प्रभावपूर्णशैल्या साह्लादपूर्णरीत्या समुदबोधयन्। ते सम्यक् प्रत्यपादयन् यत् 'राष्ट्रीय-सेवा -योजना' कथमस्मान् उपकुरुते , समाजसेवया व्यक्तित्वस्य विकासः निर्दिष्टं कथं सम्पद्यत इति। सभाध्यक्षत्वेन सुश्रीः योगिता पवारः, उपाध्यक्षत्वेन ज्ञानदेवश्चावर्तेताम्। क्रमेऽस्मिन्सभा संचालनं प्रशांतः कुमार मिश्रेण स्वानुभवकथनञ्च अर्पितः कुमारः, प्रयांशःपाठकः, दुर्गा प्रसादः, सुभद्रा, वनश्रीः चेत्यादिभिः छात्रैः कृतम्, सभायाः अन्ते औपचारिकं धन्यवादसमर्पणं भुवनमोहनवशिष्ठेन ज्ञापितम्,एतस्मिन् क्रमे सायङ्कालीनक्रीडासु रूमाल झपट्टा करवस्त्रसंग्रहणं,राम रावण आदि क्रीडा सङ्कडीताः। रात्रौ सांस्कृतिक-कार्यक्रमेण भोजनविश्रामेण च साकं तृतीयदिवसस्य संपूर्तिः समजायत। अवसरेऽस्मिन् संयोजकः डा. राकेश कुमार वर्मा, अध्यापकः डा. गोकुलानन्दः तिवारी, डा. एस् कृष्णा, डा. एस्. टी. पी. कनकवल्ली महोदयाः स्वयं सेविनः छात्राश्च सर्वे समुपस्थिताः आसन्।

# अखिलभारतीयसिविलसेवासुयोगासनस्पर्धायां उत्तराखण्डस्य विजयध्वजः, ३ रजतपदकं २ कांस्यपदकं च प्राप्तवन्तः

## योगशिक्षकः राकेशकण्डवालः, नीलमपुरीविष्टः च उत्तराखण्डस्य प्रतिनिधित्वं कृतवन्तौ

हिमसंस्कृतवार्ताः-कुलदीपमैन्दोला। अखिलभारतीयसिविलसेवासुयोगासन स्पर्धायां उत्तराखण्डस्य योगक्रीडकाः उत्कृष्टं प्रदर्शनं कृत्वा ३ रजतपदकम्, २ कांस्यपदकम् च प्राप्तवन्तः। अस्यां राष्ट्रस्तरीयस्पर्धायां ५ मार्चतः ८ मार्चपर्यन्तं आसीत्, यस्मिन् सम्पूर्णदेशस्य ३०० योगक्रीडकाः सहभागं कृतवन्तः। उत्तराखण्डस्य योगदलस्य समर्पणं योगकौशलं च प्रशंसनीयम् वर्तते।

**रजतपदकप्राप्ताः:**
नीलमपुरीविष्टः (शारीरिकशिक्षिका, राजकीय-अन्तरविद्यालयः खीड़ा, अल्मोड़ा) – स्त्रीव्यक्तिगतवर्गे




राकेशकण्डवालः (शारीरिकशिक्षकः, राजकीय-अन्तरविद्यालयः काण्डाखालं कौड़िया, पौड़ीगढ़वालं – पुरुषव्यक्तिगतवर्गे हिमांशुः शर्मा (शारीरिकशिक्षकः एवं प्रभारीप्रधानाध्यापकः, राजकीय-उच्चतरमाध्यमिकविद्यालयः कैडाग्रामः, नैनीतालं) – पुरुषव्यक्तिगतवर्गे

**कांस्यपदकप्राप्ताः:**
नीलमनेगी – कलात्मकयोगासनस्पर्धायाम्
नीलमपुरीविष्टः – कलात्मकयोगासनस्पर्धायाम्

### उत्तराखण्डदले नेतृत्वं च

उत्तराखण्डस्य योगदलस्य व्यवस्थापकः राकेशकण्डवालः अवदत् यत् अस्यां स्पर्धायां उत्तराखण्डस्य दलेन ५ पुरुषक्रीडकाः ४ स्त्रीक्रीडकाः च सहभागं कृतवन्तः। नीलमपुरीविष्टः प्रशिक्षकत्वे नियुक्ता आसीत्, या सर्वान् प्रेरयामास मार्गदर्शनं च अददात्।
समापनसमारोहे सर्वे विजेतारः प्रमाणपत्रैः पदकैश्च सम्मानिताः। उत्तराखण्डस्य योगसाधकाः कठोरपरिश्रमेण अनुशासनेन दृढ़निश्चयेन च दर्शितवन्तः यत् ते राष्ट्रस्तरे अन्ताराष्ट्रियस्तरे च योगासनक्षेत्रे दृढं स्थानं प्राप्तुं समुत्सुकाः सन्ति।
🏆 उत्तराखण्डस्य एषा ऐतिहासिकसिद्धिः सर्वेभ्यः योगसाधकेभ्यः प्रशिक्षकेभ्यः खेलप्रेमिभ्यश्च हार्दिकं अभिनन्दनम् करोति। एषा उपलब्धिः भविष्ये योगसाधकान् स्वर्णपदकं प्राप्तुं प्रेरयिष्यति, उत्तराखण्डं च योगशक्तेः केन्द्रं करणाय महत्त्वपूर्णं योगदानं करिष्यति।

# विनोदयुता काचित्सत्यघटना

एकां सत्यघटनां स्मरामि । पूर्वं यदाहम् अष्टमकक्षायां पठामि स्म तत्कालस्य घटनेयम् । तदानीन्तनाः ग्रामीणजनाः प्रायशः अशिक्षिताः, सरलहृदयाः च आसन् । तदा जनानां मध्ये कलहप्रवञ्चनादिकं न किमपि आसीत्। प्रत्येकं जनाः एव परिश्रमिणः, स्वे स्वे कर्मणि निरताः च । अस्माकं गृहाणि प्रति प्रायशः पार्श्वीयग्रामेभ्यः कर्मकराः आगत्य आदिनं गृहस्वामिना विहितं, निर्दिष्टं कार्यं सम्पाद्य, सन्ध्यासमये पारिश्रमिकमूल्यं स्वीकृत्य च स्वस्थानं प्रत्यागच्छन्ति स्म । एकदा अस्मद्गृहे कश्चन कर्मकरः आगत्य 'किमपि कार्यमस्ति किमत्र ?' इति बहिर्भागतः उच्चैः पृष्टवान्। कः एवं प्रातर्हि आकारयति इति चिन्तयन् मम मध्यभ्राताः सत्वरं बहिरागत्य तं दृष्ट्वा 'किं जातम् ?' इति पृष्टवान् ।
'भवद्गृहे किमपि कार्यं करणीयमस्ति वा मया इति पृष्टवानस्मि' इति तेन उक्तम् । 'आम् अस्ति, प्रकोष्ठस्य कार्यम्, परन्तु दिनैकस्य पारिश्रमिकं कियद्दातव्यं भवेत् तुभ्यम् ?' इति भ्राता पृष्टवान् । 'चार कुरि' इति सदृढं तेन उक्तम् । वस्तुतः 'चार कुरि' इत्युक्ते ८०-मितरूप्यकाणि । 'एक कुरि' नाम २०/- रूप्यकाणि । (४×२० =८०)
'अस्तु तर्हि कार्यं करोतु, ८०/- रूप्यकाणि दास्यामि कार्यान्ते' इति भ्राता तम् आश्वासितवान् । तदा तेन कर्मकरेण सत्वरम् उक्तं - 'न न पूर्णतः 'चार कुरि' इत्येव मह्यं दातव्यं भवेत् । किन्तु ८०-रूप्यकाणि चेत् न स्वीक्रियन्ते मया कथञ्चिदपि' इति कर्मकरस्य हठं, गणनां च विचार्य भ्रात्रा सहैव वयं हासं हासं मूर्च्छिताः इव सञ्जाताः तदा । एतादृशाः अशिक्षिताः, परन्तु सरलहृदयाः जनाः बहुधा आसन् विगतेषु दिनेषु ।

✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

# शिवध्यानम्



त्र्यम्बकंयजामहे
जहामहे त्र्युम्बकंत्र्युम्बकं
यजामहे
त्र्यम्बकमितित्रिऽअम्बकम्।
यजामहेसुगन्धिगु सुगन्धिंयजामहे
यजामहे सुगन्धिम्।
सुगन्धिम्पुष्टि वर्द्धनम्पुष्टिवर्द्धनगु
सुगन्धिगु सुगन्धिम्पुष्टिवर्द्धनम्।
सुगन्धिमितिसुऽगन्धिम्।
पुष्टिवर्द्धनमितिपुष्टिऽव्वर्द्धनम्।
उर्वारुकमिवबन्धनाद्बन्धनादुर्व्वारु
कमिवोर्व्वारुकमिवबन्धनात्।
उर्व्वारुकमिवेत्युर्व्वा रुकम् ऽ इव।
बन्धनान्मृत्योर्म्मृत्योर्बन्धनाद्बन्धना
न्मृत्याः।
मृत्योर्म्मुक्षीयमुक्षीय
मृत्योर्म्मृत्यो मुक्षीय।
मुक्षीयमा मामा
मुक्षीयमुक्षीयमा।
मामृताद्मृतान्मामामृतात्।
अमृतादित्यमृतात्।।
पतिवेदनमितऽइतःपतिवेदनम्प
तिवेदनमितः।
पतिवेदनमितिपतिऽव्वेदनम्।
इतोमुक्षीयमुक्षीयेतऽइतोमु
क्षीय।
मुक्षीयमामा मुक्षीयमुक्षीय
मा।
मामुतोमुतोमामा मुतः।
अमुतऽइत्यमुतः।।

# मार्गजालस्य परिष्कारं कृत्वा वस्तूनाम् उत्पादनव्ययं न्यूनीकर्तुं शक्यते-गडकरी





हिमसंस्कृतवार्ताः। मार्गपरिवहन-राजमार्ग मन्त्री नितिनः गडकरी उक्तवान् यत् मार्गजालस्य परिष्कारं कृत्वा वस्तूनाम् उत्पादनव्ययं न्यूनीकर्तुं शक्यते, येन उद्योगेभ्यः उपभोक्तृभ्यः च लाभः भविष्यति। नवदिल्ल्यां फेनक-अपचालक-प्रसाधक इत्येतेषु विषयेषु आधारितं सप्तम् अन्ताराष्ट्रियसम्मेलनं सम्बोधयन् असौ उक्तवान् यत् सूक्ष्मलघुमध्यमोद्यमेभ्यः अनया प्रगत्या लाभः भविष्यति ।

# उत्तरप्रदेशसंस्कृतसंस्थाने प्रशिक्षणस्य सहभागिभिः प्रशिक्षुभिः समाचरितः अन्ताराष्ट्रियः महिलादिवसः




**(वार्ताप्रेषकः:- प्रवेशकुमारशुक्लः , लखनऊ)**

"न स्त्रीरत्नसमं रत्नम्" अन्तारष्ट्रियमहिलादिवसः प्रतिवर्षं मार्चमासस्य अष्टमे दिनाङ्के समाचर्यते । महिलानां राजनीतिकसामाजिकार्थिकादिविकासाय उत्तरप्रदेशसंस्कृतसंस्थाने सरलसंस्कृतभाषाशिक्षकप्रशिक्षणस्याष्टमे दिने प्रशिक्षणस्य प्रशिक्षुभिः द्वारा ०८/०३/२५ दिनाङ्के अन्ताराष्ट्रीयमहिलादिवसस्योपलक्ष्ये सभा समायोजिता । बृजेशाचौधरी प्रथमं वाग्देवीगीतेन समर्चिता। मुख्यवक्त्रित्वेन उपस्थितासीत् प्रेरिकाअग्रवालः वक्त्रित्वेन अनन्याश्रीवास्तवः सुरभिपाण्डेयः समुपस्थिताः आसन्। सर्वाषाञ्कृते स्वागतगीतं गीतवती जयासिंह । स्वागतभाषणैः वाक्पुष्पैः च स्वागतं कृतवती ज्योत्स्नामहोदया। आत्मसम्मानस्य भावः तासां विकल्पनिर्णयस्याधिकारावसरान् संसाधनं च प्राप्तुं तासां अधिकारान् गृहस्यान्तः बहिश्च स्वजीवनं नियन्त्रयितुं शक्तिं प्राप्तुं तासां अधिकारः तथा च राष्ट्रिय-अन्तार्राष्ट्रीयस्तरयोः अधिकसमानतापूर्णं सामाजिकमार्थिकं च व्यवस्थां निर्मातुं कथं महिलाः समर्थाः भविष्यन्तिति वक्त्री अनन्याश्रीवास्तवा उद्बोधितवती। वक्त्री सुरभीमहोदया उक्तवती "यत्रनार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः " यत्र नारीणां सम्मानं भवति तत्र देवानामावासः भवतीति। मुख्यवक्त्री प्रेरिका अग्रवालमहोदया भणितं महिलादिवसः २०२५ इति सर्वाः अद्भुताः महिलाः सम्मानयितुं दिवसोस्ति याः समाजं प्रेरयन्ति, सशक्तिकरणं कुर्वन्ति, परिवर्तनस्योदाहरणञ्च स्थापयन्ति | अस्मिन् वर्षे "कार्यं त्वरितम्" (Accelerate Action) इति विषयः सर्वान् स्मारयति यत् लैङ्गिकसमानतां प्राप्तुं प्रयत्नाः त्वरिताः करणीयाः इति बोधिताः। प्रशिक्षणप्रमुखाः धीरजमैठाणी, राधाशर्मा, अनिलगौतमः प्रशिक्षकाः:- राजनदूबेः ,सत्मम् मिश्रः महेन्द्रमिश्रः, आस्थाशुक्ला , कृतिकृष्णा प्रभृतयाः उपस्थिताः आसन्। सर्वासां साधुवादज्ञापनं अल्कातिवारी ज्ञापितवती मञ्चालनं शालिनी कृतवती । अन्नूभारती शान्तिमन्त्रेण सभायाः समापनं कारितम्

# प्रधानमन्त्री श्रीनरेन्द्रमोदी मॉरीशस्-देशस्य राष्ट्रियदिवसावसरे द्विदिवसीययात्रायै अद्य मॉरीशस्-देशं सम्प्राप्स्यति



हिमसंस्कृतवार्ताः। प्रधानमन्त्री श्रीनरेन्द्रमोदी द्विदिवसीययात्रायै अद्य मॉरीशस्-देशं सम्प्राप्स्यति। प्रधानमन्त्री मॉरीशस्-देशस्य राष्ट्रियदिवसावसरे आयोजयिष्यमाने समारोहे मुख्यातिथिरूपेण भागं भजिष्यति । प्रधानमन्त्रिणः मोदिनः इयं यात्रा तथा च मार्चमासस्य द्वादशे दिनाङ्के भविष्यमाणाय राष्ट्रियदिवस-समारोहाय सज्जता तीव्रतया प्रचलति। मॉरीशस्-देशः अष्टषष्ट्यधिक-नवदश-शततमे वर्षे ब्रिटिश-शासनात् स्वतन्त्रतां प्राप्नोत्। अस्मिन् देशे प्रतिवर्षं मार्चमासस्य द्वादशदिनाङ्के राष्ट्रियदिवसम् आमान्यते। पञ्चदशाधिक-द्विसहस्रतम-वर्षाद् अनन्तरं प्रधानमन्त्री नरेन्द्रमोदी द्वितीयवारं मॉरीशस्-देशस्य राष्ट्रियदिवससमारोहे मुख्यातिथिरूपेण सम्मिलितो भविष्यति। अद्य मॉरीशसदेशस्य राजधान्यां पोर्ट-लोइस इत्यत्र राष्ट्रियदिवसावसरे भविष्यमाणाय पथ-सञ्चलनाय सज्जता प्रचलति। भारतस्यापि एकं दलं मॉरीशस्-देशस्य राष्ट्रियदिवस-समारोहे भागं ग्रहीष्यति। सहैव भारतीय-नौसेनायाः एकः पोतः अपि अस्मिन् अवसरे मॉरीशस्-देशं प्रति गच्छन् अस्ति।

## " वन्दे संस्कृतमातरम्

## लौकिकन्यायकोशः

## कन्दुकन्यायः



कियता अपि बलेन कन्दुकम् अधःदमयामः चेत् अपि कन्दुकः उपरि एव वेगेन आगच्छति । सः तस्यः स्वभावः। तथैव सज्जनानां कियदपि दमनं कृतं चेदपि, तेषां नाशार्थं प्रयत्नः कृतः चेदपि तेषां दमनं न भवति । ते स्वकौशलेन प्रतिभया च यशः एव प्राप्नुवन्ति इति अस्य अर्थः।

डा. वर्षा प्रकाश टोणगांवकर
पुणे / महाराष्ट्रम्